प्रवेश सं० १२८३८ विषयः धर्मशास्त्रम् क्रम सं० १४०

नाम मनुस्मृतिः ग्रन्थकार

पत्र सं० ६२-८४

श्लोक सं० अक्षर सं० (पंक्तौ) ४० पंक्ति सं० (पृष्ठे) १०

आकारः ११.२ x ४.६ लिपिः दे.ना आधारः का०

वि० विवरणम् अपूर्ण

वि. १५९२.

पी० एस० यू० पी०--७७ एस० सी० ई०--१६५१--५०,०००

12173

Indira Gandhi National Centre for the Arts

॥विपुष्टेतर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु॥मृगयाक्षा दिवास्वप्नः परिवादस्त्रियो मदः॥तौर्यत्रिको वृथाघाव
कामजो दशको गणः॥पैशुन्यं साहसं द्रोहः ईर्ष्यासूयार्थदूषणं॥वाग्दंडजं च पारुष्यं क्रोधजोपि गणोष्टकः
॥द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः॥ तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ॥पानमक्षास्त्रियश्चै
व मृगया च यथाक्रमं॥एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे॥१०॥ दंडस्य पातनं चैव वाक्पारुष्यार्थदूष
णे॥ क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदा॥ सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिणः॥पूर्वं पूर्वं गुरु
तरं विद्याद्व्यसनमात्मवान्॥व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते॥व्यसन्यधोधो व्रजति स्वर्यात्य
व्यसनी मृतः॥मौलाञ्छास्त्रविदः शूरांल्लब्धलक्षान्कुलोद्गतान्॥सचिवान्सप्त चाष्टौ वा प्रकुर्वी प्रक
वीत परीक्षितान्॥अपि यत्सुकरं कर्म तदप्येकेन दुष्करं॥विशेषतोसहायेन किमु राष्ट्रं सुदुष्करं महोद
यं॥२६॥तैः सार्द्धं चिंतयेन्नित्यं सामान्यं संधिविग्रहं॥स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥तेषां स्व
स्वमभिप्रायमुपलभ्य पृथक्पृथक्॥समस्तानां च कार्येषु विदध्याद्धितमात्मने॥सर्वेषां तु विशिष्टेन

ब्राह्मणेन विपश्चिता॥ मंत्रयेत परं मंत्रं राजा षाड्गुण्यसंयुतं॥ नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि नि-
क्षिपेत्॥ तेन सार्द्धं विनिश्चित्य ततः कर्म समाचरेत्॥ अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान्॥ स-
म्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान्॥ निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः॥ तावतोतंद्रिता-
न्दक्षान्प्रकुर्वीत विचक्षणान्॥ तेषामर्थे नियुंजीत शूरान्दक्षान्कुलोद्भवान्॥ शुचीनाकरकर्मान्ते भीरू-
नंतर्निवेशने॥ दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदं॥ इंगिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्भवं॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्॥ वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते॥ अमात्य
दंड आयत्तो दंडे वैनयिकी क्रिया॥ नृपतौ कोशराष्ट्रे तु दूते संधिविपर्ययो॥ दूत एव हि संधत्ते भि-
नत्त्येव च संहतान्॥ दूतस्तत्कुरुते कर्म भिद्यंते येन वा न वा॥ स विद्यादस्य कृत्येषु निगूढेंगितचे- ६२
ष्टितैः॥ आकारमिंगितं चेष्टां भृत्येषु च चिकीर्षितं॥ बुद्ध्वा च सर्वं तत्वेन परराजचिकीर्षितं॥ तथा प्रय-

त्नमातिष्ठेद्यथात्मानं न पीडयेत्॥ जांगलं सस्यसंपन्नमार्यप्रायमनाविलं॥ रम्यमानतसामंतं स्वा-
जीव्यं देशमावसेत्॥ धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च॥ नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरं
॥ सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्॥ एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते॥ त्रीण्याद्यान्या-
श्रितास्त्वेषां मृगगर्ताश्रयाप्चराः॥ त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः॥ यथा दुर्गाश्रितानेतान्नोप-
हिंसंति शत्रवः॥ तथारयो न हिंसंति नृपं दुर्गसमाश्रितं॥ एकः शतं योधयति प्राकारस्थो धनुर्द्धरः॥
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥ तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः॥ ब्राह्मणैः शिल्पिभि-
र्यंत्रैर्यवसेनोदकेन च॥ तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः॥ गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितं॥ तदध्या-
स्योद्वहेद्भार्यां सवर्णां लक्षणान्वितां॥ कुले महति संपन्नां हृद्यां रूपगुणान्वितां॥ पुरोहितं च कुर्वीत वृणु-
यादेव चर्त्विजः॥ तस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च॥ यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः॥ ध-
र्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च॥ सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिं॥ स्याच्चाम्नायपरो लो-

Indira Gandhi National
Centre for the Arts

केवर्त्तेत पितृवन्नृषु ॥ अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः ॥ तेस्य सर्वाण्यवेक्षेत नृणां कार्याणि कु
र्वतां ॥ आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् ॥ नृपाणामक्षयो ह्येष विधिर्ब्राह्मोभिधीयते ॥ न तं
स्तेना न चामित्रा हरंति न च नश्यति ॥ तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥ न स्कंदते न व्यथते न च
नश्यति कर्हिचित् ॥ वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतं ॥ सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ॥ सह
स्रगुणमाचार्ये अनंतं वेदपारगे ॥ पात्रस्य हि विशेषेण श्रद्दधानतयैव च ॥ अल्पं वा बहु वा प्रेत्य दानस्या
वाप्यते फलं ॥ समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः ॥ न निवर्तेत संग्रामात्क्षात्रधर्ममनुस्मरन् ॥ संग्रामेष्वनि ६३
वर्तित्वं प्रजानां चैव पालनं ॥ शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परं ॥ आहवेषु मिथोन्योन्यं जिघांसंतो महीक्षितः ॥ युध्य
मानाः परं शक्त्या स्वर्गं यांत्यपराङ्मुखाः ॥ न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ॥ न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलि २
ततेजनैः ॥ न च हन्यात्स्थलारूढं न क्लीबं न कृतांजलिं ॥ न मुक्तकेशं नासीनं न तवास्मीति वादिनं ॥ न सुप्तं न विसंनाहं
न नग्नं न निरायुधं ॥ नायुध्यमानं पश्यंतं न परेण समागतं ॥ नायुधव्यसनं प्राप्तं नार्त्तं नातिपरिक्षितं ॥ न भीतं न परावृ

त्तं सतां धर्ममनुस्मरन् ॥ यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ॥ भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ यच्चा
स्य सुकृतं किंचिदमुत्रार्थमुपार्जितं ॥ भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥ रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रि
यः ॥ सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ॥ राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ॥ राज्ञा च सर्वयोधे
भ्यो दातव्यमपृथग्जितं ॥ एषोनुपस्कृतः प्रोक्तो योधधर्मः सनातनः ॥ अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे
रिपून् ॥ अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः ॥ रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥ एतच्चतुर्विधं वि
द्यात्पुरुषार्थप्रयोजनं ॥ अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतंद्रितः ॥ अलब्धमिच्छेद्दंडेन लब्धं रक्षेदवेक्षया ॥
रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन योजयेत् ॥ नित्यमुद्यतदंडः स्यान्नित्यं विवृतपौरुषः ॥ नित्यं संवृतसंवार्यो नित्यं छि
द्रानुसार्यरेः ॥ नित्यमुद्यतदंडस्य कृत्स्नमुद्विजते जगत् ॥ तस्मात्सर्वाणि भूतानि दंडेनैव प्रसाधयेत् ॥ अमाययैव
वर्तेत न कथंचन मायया ॥ बुध्येतारिप्रयुक्तां च मायां नित्यं सुसंवृतः ॥ नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं पर
स्य तु ॥ गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः ॥ बकवच्चिंतयेदर्थान्सिंहवच्च पराक्रमेत् ॥ वृकवच्चावलुंपेत शश

Indira Gandhi National
Centre for the Arts

वन्नविनिःक्षिपेत्॥ एवं विजयमानस्य येस्य स्युः परिपंथिनः॥ तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः॥ यदि ते तु
न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः॥ दंडेनैवप्रसह्यैतां छनकैर्वशमानयेत्॥ सामादीनामुपायानां चतुर्णामपि
पंडिताः॥ सामदंडौ प्रशंसंति नित्यं राष्ट्राभिवृद्धये॥ यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति॥ तथा रक्षेन्नृपो रा
ष्ट्रं हन्याच्च परिपंथिनः॥ मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया॥ सोचिराद्भ्रश्यते राष्ट्राज्जीविताच्च सबांधवः
॥ शरीरकर्षणात्प्राणाः क्षीयंते प्राणिनां यथा॥ तथा राज्ञामपि प्राणाः क्षीयंते राष्ट्रकर्षणात्॥ राष्ट्रस्य संग्रहे नि
त्यं विधानमिदमाचरेत्॥ सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते॥ द्वयोस्त्रयाणां पंचानां मध्ये गुल्ममधि
ष्ठितं॥ तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहं॥ ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा॥ विंशतीशं शते ८४
शं च सहस्रपतिमेव च॥ ग्रामे दोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयं॥ शंसे * ग्रामदशेशाय दशेशो विंशती
शिने॥ विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्॥ शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयं॥ यानि राजप्रदेयानि प्रत्य
हं ग्रामवासिभिः॥ अन्नपानेंधनादीनि ग्रामिकस्तान्यवाप्नुयात्॥ दशी कुलं तु भुंजीत विंशी पंच कुलानि तु॥ ३

ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरं॥ तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि॥ राज्ञोन्यः सचिवः स्नि
ग्धस्तानि पश्येदतंद्रितः॥ नगरे नगरे चैकं कुर्यात्सर्वार्थचिंतकं॥ उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहं॥ स ता
ननुपरिक्रमेत्सर्वानेव सदा स्वयं॥ तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः॥ राज्ञो हि रक्षाधिकृताः परस्वादायिनः श
ठाः॥ भृत्या भवंति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥ ये कार्यिकेभ्योर्थमेव गृह्णीयुः पापचेतसः॥ तेषां सर्वस्वमादाय
राजा कुर्यात्प्रवासनं॥ राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च॥ प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः॥
पणो देयोवकृष्टस्य षडुत्कृष्टस्य वेतनं॥ षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः॥ क्रयविक्रयमध्वानं
भक्तं च सपरिव्ययं॥ योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान्॥ यथा फलेन युज्येत राजा कर्ता च कर्मणां॥ तथावे
क्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान्॥ यथाल्पाल्पमदंत्याद्यं वार्योकोवत्सषट्पदाः॥ तथाल्पाल्पो गृहीतव्यो राष्ट्रा
द्राज्ञाब्दिकः करः॥ पंचाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः॥ धान्यानामष्टमो भागः षष्ठो द्वादश एव वा॥ आद
दीताथ षड्भागं द्रुमांसमधुसर्पिषां॥ गंधौषधिरसानां च पुष्पमूलफलस्य तु॥ पत्रशाकतृणानां च चर्मणां वैदल

Indira Gandhi National
Centre for the Arts

स्य च ॥ म्लेच्छानां च भाषाणां सर्वस्याप्यंत्यजस्य च ॥ म्रियमाणोप्याददीत न राजा श्रोत्रियात्करं ॥ न च क्षुधास्य सं-
सीदेच्छ्रोत्रियो विषये वसत् ॥ यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ॥ तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सी-
दति ॥ श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत् ॥ संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसं ॥ संरक्ष्यमाणो राज्ञा यं कु-
रुते धर्ममन्वहं ॥ तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च ॥ यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितं ॥ व्यवहारेण
जीवंतं राष्ट्रे राजा पृथग्जनं ॥ कारुकान्शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ॥ एकैकं कारयेत्कर्म मासि मासि
महीपतिः ॥ नोच्छिंद्यादात्मनो मूलं परेषां चातितृष्णया ॥ उच्छिंदन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् ॥ तीक्ष्ण-
श्चैव मृदुश्चैव स्यात्कार्यं वीक्ष्य महीपतिः ॥ तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमत ॥ अमात्यमुख्यं धर्मज्ञं प्राज्ञं दा-
न्तं कुलोद्गतं ॥ स्थापयेदासने तस्मिन्खिन्नः कार्येक्षणे नृणां ॥ एवं सर्वं विधायेदमितिकर्तव्यमात्मनः ॥ युक्तश्चै- ५५
वाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥ विक्रोशंत्यो यस्य राष्ट्राद्ध्रियंते दस्युभिः प्रजाः ॥ संपश्यतः सभृत्यस्य मृतः स न
स जीवति ॥ क्षत्रियस्य परो धर्मः प्रजानामेव पालनं ॥ निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ उत्थाय पश्चिमे ४

यामे कृतशौचः समाहितः ॥ हुताग्नीन्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभां ॥ तत्र स्थितः प्रजाः सर्वाः प्रतिनंद्य विसर्ज-
येत् ॥ विसृज्य च प्रजाः सर्वा मंत्रयेत्सह मंत्रिभिः ॥ गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ॥ अरण्ये निःशलाके वा
मंत्रयेदविभावितः ॥ यस्य मंत्रं न जानंति समागम्य पृथग्जनाः ॥ स कृत्स्नां पृथिवीं भुंक्ते कोषहीनोपि पार्थिवः ॥
जडमूकांधबधिरांस्तैर्यग्योनान्वयोतिगान् ॥ स्त्रीम्लेच्छव्याधितव्यंगान्मंत्रकालेपसारयेत् ॥ भिंदंत्यवमता
मंत्रं तैर्यग्योनास्तथैव च ॥ स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥ मध्यंदिनेर्धरात्रे वा विश्रांतो विगतक्ल-
मः ॥ चिंतयेद्धर्मकामार्थान्सार्धं तैरेक एव वा ॥ परस्परविरुद्धानां तेषां च समुपार्जनं ॥ कन्यानां संप्रदानं च
कुमाराणां च रक्षणं ॥ दूतसंप्रेषणं चैव कार्यशेषं तथैव च ॥ अंतःपुरप्रचारं च प्रणिधीनां च चेष्टितं ॥ कृत्स्नं
चाष्टविधं कर्म पंचवर्गं च तत्वतः ॥ अनुरागापरागौ च प्रचारं मंडलस्य च ॥ मध्यमस्य प्रचारं च विजिगीषोश्च
चेष्टितं ॥ उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः ॥ एताः प्रकृतयो मूलं मंडलस्य समासतः ॥ अष्टौ चान्याः
समाख्याताः द्वादशैव तु ताः स्मृताः ॥ अमात्यराष्ट्रदुर्गार्थदंडाख्याः पंच चापराः ॥ प्रत्येकं कथिता ह्येताः संक्षेपे

Indira Gandhi National
Centre for the Arts

णाद्विसप्ततिः॥ अनंतरमरिं विद्यादरिसेविनमेव च॥ अरेरनंतरं मित्रमुदासीनं ततः परं॥ तान्सर्वानभिसंदध्या
त्सामादिभिरुपक्रमैः॥ प्रसंस्थैव सम्यक्सौम्य पौरुषेणानयेन च॥ संधिं च विग्रहं चैव यानमासनमेव च॥ द्वैधी
भावं संश्रयं च षड्गुणांश्चिंतयेत्सदा॥ आसनं चैव यानं च संधिविग्रहमेव च॥ कार्यं वीक्ष्य प्रयुंजीत द्वैधं संश्रय
मेव च॥ संधिं च द्विविधं विद्याद्राजा विग्रहमेव च॥ उभे यानासने चैव द्वैधं संश्रयमेव च॥ समानयानकर्मा
च विपरीतस्तथैव च॥ तदा त्वापत्तिसंयुक्तः संधिर्ज्ञेयो विलक्षणः॥ स्वपक्षकृतस्य कार्यार्थमकाले काल एव वा
॥मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः॥ एकाकिनस्त्वात्ययिके कार्ये प्राप्ते यदृच्छया॥ संहतस्य च मित्रे
ण द्विविधं यानमुच्यते॥ क्षीणस्य चैककशो दैवात्पूर्वकृतेन वा॥ मित्रस्य चानुरोधेन द्विविधं स्मृतमासनं
॥बलस्य स्वामिनश्चैव स्थितिः कार्यस्य सिद्धये॥ द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥ अर्थसंपादनार्थं ८८
च पीड्यमानस्य शत्रुभिः॥ साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः॥ यदावगच्छेदायत्यामाधिक्यं ध्रु
वमात्मनः॥ तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत्॥ यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशं॥ अत्युच्छ्रितं ५

तं तथात्मानं तदा मन्येत विग्रहं॥ यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकं॥ परस्य विपरीतं च तदा यायाद्रिपून्प्रति
।यदा तु स्यात्परिक्षीणो वाहनेन बलेन च॥ तदासीत प्रयत्नेन शनकैः सांत्वयन्रिपून्॥ मन्येतारिं यदा राजा स
र्वथा बलवत्तरं॥ तदा बलं द्विधा कृत्वा साधयेत्कार्यमात्मनः॥ यदा परबलानां तु गमनीयतमो भवेत्॥ तदा तु संश्र
येत्क्षिप्रं धार्मिकं बलिनं नृपं॥ निग्रहं प्रकृतीनां तु कुर्याद्यो रिबलस्य च॥ उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा
॥यदि तत्रापि संपश्येद्दोषं संश्रयकारितं॥ सुयुद्धमेव तत्रापि निर्विशंकः समाचरेत्॥ सर्वोपायैस्तथा कुर्यान्नी
तिज्ञः पृथिवीपतिः॥ यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः॥ आयतिं सर्वकार्याणां तदात्वं च विचारये
त्॥ अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः॥ आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः॥ अतीते कार्यशेषज्ञः
शत्रुभिर्नाभिभूयते॥ यथैन ——— मित्रोदासीनशत्रवः॥ तथा यत्नं विदध्यादेष सामासिको न
यः॥ यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः॥ तदानेन विधानेन यायाद्रिपुरं शनैः॥ मार्गशीर्षे शुभे मासि
यायाद्यात्रां महीपतिः॥ फाल्गुने वापि चैत्रे वा मासे प्रति यथाबलं॥ अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं ज

Indira Gandhi National
Centre for the Arts

यं॥तदायायाद्विगृह्यैवव्यसनेचोत्थितेरिपोः॥कृत्वाविधानंमूलेतुयात्रिकंचयथाविधि॥उपगृह्यास्पदंचैवच
रान्सम्यग्विधायच॥संशोध्यत्रिविधंमार्गंषड्विधंचबलंस्वकं॥सांपरायिककल्पेनयायादरिपुरंशनैः॥शत्रु
सेविनिमित्रेचगूढेयुक्ततरोभवेत्॥गतप्रत्यागतेचैवसहिकष्टतरोरिपुः॥दंडव्यूहेनतंमार्गंयायात्तुशकटे
नवा॥वाराहमकराभ्यांवासूच्यावागरुडेनवा॥यतस्तुभयमाशंकेत्ततोविस्तारयेद्बलं॥पद्मेनचैवव्यूहेननिवि
शेततदास्वयं॥सेनापतिबलाध्यक्षौसर्वदिक्षुनिवेशयेत्॥आशंकेतभयंयस्मात्प्राचींतांकल्पयेद्दिशं॥गु
ल्मांश्चस्थापयेदाप्तान्कृतसंज्ञान्समंततः॥स्थानेयुद्धेचकुशलानभीरूनविकारिणः॥संहतान्योधयेदल्पा
न्कामंविस्तारयेद्बहून्॥सूच्यावज्रेणचैवैतान्व्यूहेनव्यूह्ययोधयेत्॥स्यंदनाश्वैःसमेयुध्येदनूपेनौद्वि
पैस्तथा॥वृक्षगुल्मावृतेचापैरसिचर्मायुधैस्तथा॥कौरुक्षेत्रांश्चमात्स्यांश्चपांचालान्शूरसेनजान्॥दीर्घा ६७
न्लघूंश्चैवनरानग्रानीकेषुयोजयेत्॥प्रधर्षयेद्बलंव्यूह्यतांश्चसम्यक्परीक्षयेत्॥चेष्टाश्चैवविजानीया
दरीन्योधयतामपि॥उपरुध्यारिमासीतराष्ट्रंचास्योपपीडयेत्॥दूषयेच्चास्यसततंयवसान्नोदकेंधनं

भिंद्याच्चैवतडागानिप्राकारपरिखास्तथा॥उपजप्यानुपजपेत्तस्माद्युद्धंविवर्जयेत्॥त्रयाणामप्युपायानां
पूर्वोक्तानामसंभवे॥तथायुद्ध्येतसंपन्नोविजयेतरिपून्यथा॥जित्वासंपूजयेद्देवान्ब्राह्मणांश्चैवधार्मि
कान्॥प्रदद्यात्परिहारांश्चख्यापयेदभयानिच॥सर्वेषांतुविदित्वैषांसमासेनचिकीर्षितं॥स्थापयेत्तत्रतद्वं
श्यंकुर्याच्चसमयक्रियां॥प्रमाणानिचकुर्वीततेषांधर्मान्यथोदितान्॥रत्नैश्चपूजयेदेनंप्रधानपुरुषैः
सह॥आदानमप्रियकरंदानंचप्रियकारकं॥अभीप्सितानामर्थानांकालयुक्तंप्रशस्यते॥सर्वंकर्मेदमायं
त्तंविधानेदैवमानुषे॥तयोर्दैवमचिंत्यंतुमानुषेविद्यतेक्रिया॥सहवापिव्रजेद्युक्तःसंधिंकृत्वाप्रयत्नतः॥मि
त्रंहिरण्यंभूमिंवासंपश्यंस्त्रिविधंफलं॥पार्ष्णिग्राहंचसंप्रेक्ष्यतथाक्रंदंचमंडले॥मित्रादथाप्यमित्राद्वा
यात्राफलमवाप्नुयात्॥हिरण्यभूमिसंप्राप्त्यापार्थिवोनतथैधते॥यथामित्रंध्रुवंलब्ध्वाकृशमप्यायति
क्षमं॥धर्मज्ञंचकृतज्ञंचतुष्टप्रकृति – चर्वेयत्॥अनुरक्तंस्थिरारंभंलघुमित्रंप्रशस्यते॥प्राज्ञंकुलीनंशूरंच
दक्षंदातारमेवच॥कृतज्ञंधृतिमंतंचकष्टमाहुररिंबुधाः॥आर्यतापुरुषज्ञानंशौर्यंकरुणवेदिता॥स्थौल

Indira Gandhi National
Centre for the Arts

लदंचसततमुदासीनगुणोदयः॥ क्षेम्यांसस्यप्रदांनित्यंपशुवृद्धिकरीमपि॥ त्यजेन्नृपोभूमिमात्मार्थमवि
चारयन्॥ आपदार्थंधनंरक्षेद्दारान्रक्षेद्धनैरपि॥ आत्मानंसततंरक्षेद्दारैरपिधनैरपि॥ सहसर्वाःसमु
त्पन्नाःप्रसमीक्ष्यापदोभृशं॥ संयुक्तांश्चवियुक्तांश्चसर्वोपायान्सृजेद्बुधः॥ उपेतारमुपेयंचसर्वोपायांश्च
कृत्स्नशः॥ एतत्त्रयंसमाश्रित्यप्रयतेतार्थसिद्धये॥ एवंसर्वमिदंराजासहसंमंत्र्यमंत्रिभिः॥ आयम्याप्लुत्य
मध्याह्नेभोक्तुमंतःपुरंविशेत्॥ तत्रात्मभूतैःकालज्ञैरहार्यैःपरिचारकैः॥ सुपरीक्षितमन्नाद्यमद्यान्मंत्रै
र्विषापहैः॥ विषघ्नैरगदैश्चास्यसर्वद्रव्याणियोजयेत्॥ विषघ्नानिचरत्नानिनियतोधारयेत्सदा॥ परी
क्षिताःस्त्रियश्चैनंव्यजनोदकधूपनैः॥ वेषाभरणसंशुद्धाःस्पृशेयुःसुसमाहिताः॥ एवंप्रयत्नंकुर्वीतया
नशय्यासनाशने॥ स्नानेप्रसाधनेचैवसर्वालंकारिकेषुच॥ भुक्तवान्विहरेच्चैवस्त्रीभिरंतःपुरेसह॥ ६८
विहृत्यचयथाकालंपुनःकार्याणिचिंतयेत्॥ अलंकृतश्चसंपश्येदायुधीयंपुनर्जनं॥ वाहनानिचसर्वाणिशस्त्राण्याभरणानिच॥
संध्यांचोपास्यशृणुयादंतर्वेश्मनिशस्त्रभृत्॥ रहस्याख्यायिनांचैव

प्रणिधीनांचचेष्टितं॥ गत्वाकक्षांतरंत्वन्यंसमनुज्ञाप्यतंजनं॥ प्रविशेद्भोजनार्थंतुस्त्रीभिरंतःपुरंपुनः॥ तत्र
भुक्त्वापुनःकिंचित्तूर्यघोषैःप्रहर्षितः॥ संविशेत्तुयथाकालमुत्तिष्ठेच्चगतक्लमः॥ एतद्विधानमातिष्ठेदरो
गःपृथिवीपतिः॥ अस्वस्थःसर्वमेतत्तुभृत्येषुविनियोजयेत्॥ ॥इतिमानवेधर्मशास्त्रेसप्तमोध्यायः
॥ ॥व्यवहारान्दिदृक्षुस्तुब्राह्मणैःसहपार्थिवः॥ मंत्रज्ञैर्मंत्रिभिश्चैवविनीतःप्रविशेत्सभां॥ तत्रा
सीनःस्थितोवापिपाणिमुद्यम्यदक्षिणं॥ विनीतवेषाभरणःपश्येत्कार्याणिकार्यिणां॥ २॥ प्रत्यहंदेश
दृष्टैश्चशास्त्रदृष्टैश्चहेतुभिः॥ अष्टादशसुमार्गेषुनिबद्धानिपृथक्पृथक्॥ ३॥ तेषामाद्यमृणादानंनि
क्षेपोस्वामिविक्रयः॥ संभूयचसमुत्थानंदत्तस्यानपकर्मच॥ वेतनस्यैवचादानंसंविदश्चव्यतिक्रमः॥
क्रयविक्रयानुशयोविवादःस्वामिपालयोः॥ सीमाविवादधर्मश्चपारुष्येदंडवाचिके॥ स्तेयंचसाहसंचैव
स्त्रीसंग्रहणमेवच॥ स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयएवच॥ पदान्यष्टादशैतानिव्यवहारस्थिताविह
॥ एषुस्थानेषुभूयिष्ठंविवादंचरतांनृणां॥ धर्मंशाश्वतमाश्रित्यकुर्यात्कार्यविनिर्णयं॥ यदास्वयंन

Indira Gandhi National
Centre for the Arts

कुर्यात्तु नृपतिः कार्यदर्शनं तदा नियुंज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने॥ सोस्य कार्याणि पश्येत सभ्यैरेव त्रिभिर्वृ
तः॥ सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा॥ यस्मिन्देशे निषीदंति विप्रा वेदविदस्त्रयः॥ राज्ञश्चाधिकृतो वि
द्वान्ब्राह्मणस्तां सभां विदुः॥ धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते॥ शल्यं चास्य न कृंतंति विद्धास्तत्र स
भासदः॥ सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसं॥ अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी॥ यत्र धर्मो ह्यधर्मेण
सत्यं यत्रानृतेन च॥ हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः॥ धर्म एव हतो हंति धर्मो रक्षति रक्षितः॥ त
स्माद्धर्मो न हंतव्यो मा नो धर्मो हतोवधीत्॥ वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलं॥ वृषलं तं विदुर्देवास्त
स्माद्धर्मं न लोपयेत्॥ एक एव सुहृद्धर्मो निधनेप्यनुयाति यः॥ शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥ पादो
धर्मस्य कर्तारं पादः साक्षिणमृच्छति॥ पादः सभासदः सर्वान्पादो राजानमृच्छति॥ राजा भवत्यनेनास्तु ६९
मुच्यंते च सभासदः॥ एनो गच्छति कर्तारं निंदार्हो यत्र निंद्यते॥ जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः
धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन॥ यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनं॥ तस्य सीदति तद्राष्ट्रं पंके गौरि

व पश्यतः॥ यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रांतमद्विजं॥ विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितं॥ ध
र्मासनमधिष्ठाय संवीतांगः समाहितः॥ प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत्॥ अर्थानर्थावुभौ बु
द्ध्वा धर्माधर्मौ च केवलौ॥ वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणां॥ बाह्यैर्विभावयेल्लिंगैर्भावमंतर्ग
तं नृणां॥ स्वरवर्णेंगिताकारैश्चक्षुषा चेष्टितेन च॥ आकारैरिंगितैर्गत्या चेष्टया भाषितेन च॥ नेत्रवक्त्रविका
रैश्च गृह्यतेंतर्गतं मनः॥ बालदायादिकं रिक्थं तावद्राजानुपालयेत्॥ यावत्स स्यात्समावृत्तो यावच्चातीतशै
शवः॥ वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च॥ पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च॥ जीवंतीनां
तु तासां ये हरेयुर्बांधवा धनं॥ तांछिष्याच्चौरदंडेन धार्मिकः पृथिवीपतिः॥ प्रनष्टस्वामिकं द्रव्यं रा
जा त्र्यब्दं निधापयेत्॥ अर्वाक् त्र्यब्दाद्धरेत्स्वामी हरेत परतो नृपः॥ ममेदमिति यो ब्रूयात्सोनियोज्यो यथावि
धि॥ संपाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति॥ अवेदयन्प्रनष्टस्य देशकालौ च तत्त्वतः॥ वर्णरूपं प्रमाणं च
तत्समं दंडमर्हति॥ आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः॥ दशमं द्वादशं वापि सतां धर्ममनुस्मरन्॥

Indira Gandhi National
Centre for the Arts

प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितं॥ यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातजेत्॥ ममेदमिति यो ब्रूया
न्निधिं सत्येन मानवः॥ तस्याददीत षड्भागं राजा द्वादशमेव वा॥ अनृतं तु वदन्दंड्यः स्ववित्तस्यांशमष्टमं
॥ तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलां॥ विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिं॥ अशेषतोऽप्या
ददीत सर्वस्याधिपतिर्हि सः॥ यत्तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ॥ तस्माद्द्विजेभ्यो दत्वार्धमर्धं कोशे
प्रकल्पयेत्॥ निधीनां हि पुराणानां धातूनामेव च क्षितौ॥ अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः॥
दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं॥ राजा तदुपयुंजानश्चौरस्याप्नोति किल्बिषं॥ जातिजानपदान्ध
र्मान् श्रेणीधर्मांश्च धर्मवित्॥ समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्॥ स्वानि कर्माणि कुर्वाणा दूरे
संतोऽपि मानवाः॥ प्रिया भवंति लोकस्य स्वे स्वे कर्मण्यवस्थिताः॥ नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पू ७०
रुषः॥ न चा प्रापितमन्येन ग्रसेदर्थं कथंचन॥ यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदं॥ नयेत्तथानुमा
नेन ध ———— ॥ उदक्षुरखान्याक्षुरखान्वा पूर्वोक्तैवैश्चिन्हैश्चीन्॥ आहूय साक्षिणः पृच्छेन्नियम

शपथैर्दशं॥ समस्तान्विदिताचारान्नूनियुंजीत धीनकृष्टपकृ॥ ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पा
र्थिवं॥ गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥ ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः॥ मित्रद्रुहः
———— कल्याण मन्यसे॥ नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः॥ यमो वैवस्वतो देवो यस्तवै
ष हृदि स्थितः॥ तेन चेदविवादस्ते मा गंगां मा कुरून्गमः॥ नग्नो मुंडः कपालेन भिक्षार्थी क्षुत्पिपासितः॥ अंधः
शत्रुगृहं गच्छेद्यः साक्ष्यमनृतं वदेत्॥ अवाक्शिरास्तमस्यंधे किल्बिषी नरकं पतेत्॥ यः प्रश्नं वितथं ब्रूयात्पृ
ष्टः सन्धर्मनिश्चये॥ अंधो मत्स्यानिवाश्नाति कंटकैः स नरः सह॥ यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां
गतः॥ यस्य विद्वान्हि वदतः क्षेत्रज्ञो नाभिशंकते॥ तस्मान्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः॥ यावतो बां
धवान्यस्मिन्हन्ति साक्ष्येऽनृतं वदन्॥ तावतः संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः॥ पंच पश्वनृते हन्ति
दश हन्ति गवानृते॥ शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥ हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्॥ स
र्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः॥ अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने॥ अब्जेषु चैव रत्नेषु सर्वे

Indira Gandhi National Centre for the Arts

ष्टश्मनेषु च॥ एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे॥ यथाश्रुतं यथादृष्टं सर्वमेवांजसा वद॥ गोरक्षकान्
वाणिजकांस्तथा कारुकुशीलवान्॥ प्रेष्यान्वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्॥ तद्वदन्धर्मतोर्थेषु
जानन्नप्यन्यथा नरः॥ न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदंति तां॥ शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्व
धः॥ तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते॥ वाग्दैवत्यैश्चरुभिर्यजेरंस्ते सरस्वतीं॥ अनृतस्यैनसस्तस्य
कुर्वाणा निष्कृतिं परां॥ कूष्मांडैर्वापि जुहुयाद्घृतमग्नौ यथाविधि॥ उदित्यृचा वा वारुण्या तृचेनाब्दैवते
न वा॥ त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः॥ तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्वतः॥ यस्य दृ
श्री श्येत सप्ताहादुक्तवाक्यस्य साक्षिणः॥ रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥ असाक्षिकेषु त्वर्थेषु ७१
मिथो विवदमानयोः॥ अविंदंस्तत्त्वतः सत्यं शपथेनापि लंभयेत्॥ महर्षिभिश्च देवैश्च कार्यार्थं शपथाज
याः कृताः॥ वसिष्ठश्चापि शपथं शेपे पैजवने नृपे॥ न वृथा शपथं कुर्यात्स्वल्पेप्यर्थे नरो बुधः॥ वृथा हि श
पथं कुर्वन्प्रेत्य चेह च नश्यति॥ कामिनीषु विवाहेषु गवां भक्ष्ये तथेंधने॥ ब्राह्मणाभ्युपपत्तौ च शपथे २

नास्ति पातकं॥ सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः॥ गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥ अग्निं वा
हारयेदेनमप्सु चैनं निमज्जयेत्॥ पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक्॥ यमिद्धो न दहत्यग्निरापो नोन्म
ज्जयंति च॥ न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः॥ वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा॥ नाग्निर्द
दाह रोमापि सत्येन जगतः स्पृशः॥ यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत्॥ तत्तत्कार्यं निवर्तेत कृतं
चाप्यकृतं भवेत्॥ लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च॥ अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते॥ एषा
मन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्॥ तस्य दंडविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः॥ लोभात्सहस्रं दंड्यस्तु मोहात्पू
र्वं तु साहसं॥ भयाद्द्वौ मध्यमौ दंडौ मैत्रात्पूर्वं चतुर्गुणं॥ कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं॥ अज्ञानाद्द्वे शते
पूर्णे बालिश्याच्छतमेव तु॥ एतानाहुः कौटसाक्ष्ये प्रोक्तान्दंडान्मनीषिभिः॥ धर्मस्याव्यभिचारार्थमधर्मनियमा
य च॥ कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः॥ प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेत्॥ दश स्थाना
नि दंडस्य मनुः स्वायंभुवोऽब्रवीत्॥ त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्॥ उपस्थमुदरं जिह्वा हस्तौ पादौ

Indira Gandhi National
Centre for the Arts

चपंचमं॥ चतुर्भ्यासाचकौचिचधनं वै हस्तयैव च॥ अनुबंधं परिज्ञाय देशकालौ च तत्वतः॥ सारापराधौ चा
चपंचमं॥ चतुर्भागं साक्ष्यकौचि च धनं वै हस्तयैव च॥ अनुबंधं परिज्ञाय देशकालौ च तत्वतः॥ सारापराधौ चा
लोच्य दंडं दंड्येषु पातयेत्॥ अधर्मदंडनं लोके यशोघ्नं कीर्तिनाशनं॥ अस्वर्ग्यं च परत्रापि तस्मात्तत्परिव
र्जयेत्॥ अदंड्यान् दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्॥ अयशो महदाप्नोति नरकं चैव गच्छति॥ वाग्दंडं
प्रथमं कुर्याद्धिग्दंडं तदनंतरं॥ तृतीयं धनदंडं तु वधदंडमतःपरं॥ वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुया
त्॥ तदेषु सर्वमप्येतत्प्रयुंजीत चतुष्टयं॥ लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि॥ ताम्ररूप्यसुवर्णानां ताः
प्रवक्ष्याम्यशेषतः॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥ त्रसरेण
वोष्टौ विज्ञेया लिक्षैका परिमाणतः॥ ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः॥ सर्षपाः षड् यवो मध्यस्त्रियवं त्वे
ककृष्णलं॥ पंचकृष्णलिको माषस्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पलानि धरणं दश॥ द्वे कृष्णले स ७२
मधृते विज्ञेयो रूप्यमाषकः॥ ते षोडश स्याद्धरणं पुराणश्चैव राजतः॥ कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः
पणः॥ धरणानि दश ज्ञेयः शतमानस्तु राजतः॥ चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः॥ पणानां द्वे शते १२

सार्द्धे प्रथमः साहसः स्मृतः॥ मध्यमः पंच विज्ञेयः सहस्रं त्वेव चोत्तमः॥ ऋणे देये प्रतिज्ञाते पंचकं शत
मर्हति॥ अपह्नवे तद्द्विगुणं तन्मनोरनुशासनं॥ वशिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धनीं॥ अशीतिभागं गृह्णी
यान्मासाद्वार्द्धुषिकः शते॥ द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन्॥ द्विकं शतं हि गृह्णानो न भवत्यर्थकि
ल्बिषी॥ द्विकं त्रिकं चतुष्कं च पंचकं च शतं समं॥ मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः॥ न त्वेवाधौ सो
पकारे कौसीदीं वृद्धिमाप्नुयात्॥ न चाधेः कालसंरोधान्निसर्गोस्ति न विक्रयः॥ न भोक्तव्यो बलादाधि
र्भुंजानो वृद्धिमुत्सृजेत्॥ मूल्येन तोषयेच्चैनमाधिस्तेनोन्यथा भवेत्॥ आधिश्चोपनिधिश्चोभौ न काला
त्ययमर्हतः॥ अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ॥ संप्रीत्या भुज्यमानानि न नश्यंति कदाचन॥
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते॥ यत्किंचिद्दशवर्षाणि संनिधौ प्रेक्षते धनी॥ भुज्यमानं परैस्तूष्णीं
न स तल्लब्धुमर्हति॥ अजडश्चेदपोगंडो विषये चास्य भुज्यते॥ भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति॥ आधिः
सीमा बालधनं निक्षेपोपनिधिः स्त्रियः॥ राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति॥ यः स्वामिनाननुज्ञात

माधिर्भुक्तेविचक्षणः॥ तेनार्थवृद्धिर्नोक्तव्या तस्य भोगस्य निःकृतिः॥ कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता॥
धान्ये सदे लवे वाह्ये नातिक्रामति पंचतां॥ कृतानुसारादधिका व्यतिरिक्ता न सिध्यति॥ कुसीदपथमाहु
स्तं पंचकं शतमर्हति॥ नाभिसांवत्सरीं वृद्धिं न चादृष्टां विनिर्हरेत्॥ चक्रवृद्धिः कालिका च कारिता कायिका च
जा॥ ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियां॥ स दत्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत्॥ अदर्शयित्वा
तत्रैव हिरण्यं परिवर्त्तयेत्॥ यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति॥ चक्रवृद्धिं समारूढो देशकालव्य
वस्थितः॥ अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात्॥ समुद्रयानकुशला देशकालार्थदर्शिनः॥ स्थापयं
ति तु यां वृद्धिं सा तत्राधिगमं प्रति॥ लाभस्य प्रतिभूर्लिखितं दर्शनाभेहमानवः॥ अदर्शयन्नसतस्तस्य प्राण
प्रत्यक्षधनागमं॥ प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्॥ दंडशुल्कावशेषं च न पुत्रो दातुमर्हति ७३
॥ दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः॥ दानप्रतिभुवि प्रेते दायादानपि दापयेत्॥ अदातरि पु
नर्दाता विज्ञातप्रकृतावृणं॥ पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना॥ निरादिष्टधनश्चेत्तु प्रतिभूः स्या

दलंधनः॥ स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः॥ मत्तोन्मत्तार्त्तव्यध्यधीनैर्बालेन स्थविरेण वा॥ असंबद्धकृ
तश्चैव व्यवहारो न सिध्यति॥ सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता॥ बहिश्चेद्भाष्यते धर्मान्नियताद्व्या
वहारिकात्॥ योगाधमनविक्रीतं योगदानप्रतिग्रहं॥ यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेत्॥ ग्र
हीता यदि नष्टः स्यात्कुटुंबार्थे कृतो व्ययः॥ दातव्यं बांधवैस्तत्स्यात्प्रविभक्तैरपि स्वतः॥ कुटुंबार्थेऽधीनोपि
व्यवहारं यमाचरेत्॥ स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत्॥ बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितं॥
सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत्॥ त्रयः परार्थे क्लिश्यंति साक्षिणः प्रतिभूः कुलं॥ चत्वारस्तूप
चीयंते विप्र आढ्यो वणिङ्नृपः॥ अनादेयं नाददीत परिक्षीणोपि पार्थिवः॥ न चादेयं समृद्धोपि सूक्ष्ममप्य
र्थमुत्सृजेत्॥ अनादेयस्य चादानादादेयस्य च वर्जनात्॥ दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति॥
स्वदानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात्॥ बलं संजायते राज्ञः स प्रेत्येह च वर्द्धते॥ तस्माद्यम इव स्वामी
स्वयं हित्वा प्रियाप्रिये॥ वर्त्तेत याम्यया वृत्त्या जितक्रोधो जितेंद्रियः॥ यस्तु धर्मेण कार्याणि कुर्वीत मो

Indira Gandhi National
Centre for the Arts

हानराधिपः॥ अचिरात्तं दुरात्मानं वशे कुर्वीत शत्रवः॥ कामक्रोधौ च संयम्य योऽर्थान्धर्मेण पश्यति॥ प्र
जास्तमनुवर्त्तंते समुद्रमिव सिंधवः॥ यः साधयंतं छंदेन वेदयेद्धनिकं नृपे॥ स राज्ञा चतुर्भागं दातव्यस्त
स्य तद्धनं॥ कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः॥ समोवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः॥
अनेन विधिना राज्ञा मिथो विवदतां नृणां॥ साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत्॥ कुलजे वृत्त
संपन्ने धर्मज्ञे सत्यवादिनि॥ महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः॥ यो यथा निक्षिपेद्धस्ते यमर्थं
यस्य मानवः॥ स तथैव गृहीतव्यो यथा दायस्तथा ग्रहः॥ यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छ
ति॥ स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ॥ स यदि प्रतिपद्येत यथान्यस्तं यथाकृतं॥ न तत्र विद्य ७४
ते किंचिद्यत्परैरभियुज्यते॥ तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि॥ उपसंगृह्य दाप्यः स्यादिति ध
र्मस्य धारणा॥ साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः॥ अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः॥ नि ७
क्षेपोपनिधी नित्यं न देयौ प्रत्यनंतरे॥ नश्यतो विनिपाते तावनिपाते त्वनाशिनौ॥ स्वयमेव तु यो दद्यान्मृ

तस्य प्रत्यनंतरे॥ न स राज्ञाभियोक्तव्यो न निक्षेप्तुः स्वकैर्बंधुभिः॥ अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकं॥ वि
चार्य तस्य वा वृत्तं साम्नैव परिसाधयेत्॥ निक्षेपेष्वेव सर्वेषु विधिः स्यात्परिसाधने॥ समुद्रे नाप्नुयात्किं
च्चिद्यदि तस्मान्न संहरेत्॥ चौरैर्हृतं जलेनोढमग्निना दग्धमेव च॥ न दद्याद्यदि तस्मात्स न संहरति किंच
न॥ निक्षेपस्यापहर्त्तारमनिक्षेप्तारमेव च॥ तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमं॥ निक्षेपस्यापहर्त्तारं
तत्समं दापयेद्दंडं॥ तथोपनिधिहर्त्तारमविशेषेण पार्थिवः॥ उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः॥ स
सहायः स हंतव्यः प्रकाशं विविधैर्वधैः॥ निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ॥ तावानेव स विज्ञेयो
विब्रुवन्दंडमर्हति॥ मिथो दायः कृतो येन गृहीतो मिथ एव वा॥ मिथ एव प्रदातव्यो यथा दायस्तथा ग्र
हः॥ निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च॥ राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारणं॥ विक्रीणीते
परस्य स्वं योऽस्वामी स्वाम्यसंमतः॥ न तं नयेत्तत्साक्ष्यं तु स्तेनमस्तेनमानिनं॥ अवहार्यो भवेच्चैव सान्वयः
षड्गुणं दमं॥ निरन्वयोऽनवसरः प्राप्तः स्याच्चौरकिल्बिषं॥ अस्वामिना कृतो यस्तु क्रयो विक्रय एव वा॥ अकृ

तः स तु विज्ञेयो व्यवहारे यथास्थितिः॥ अनेन विधिना ग्राह्यः कुर्वन्न स्वामिविक्रयं॥ अज्ञानात्सज्ञानपूर्वं तु
चौरवद्दंडमर्हति॥ संभोगो दृश्यते राज्ञा नास्तिको लभते धनं॥ नान्यदन्येन संसृष्टरूपं विक्रेयमर्हति॥ न सा
वध्येन चान्यूनेन दूरेन तिरोहितं॥ अन्यां चेद्दर्शयित्वान्यां वोढुः कन्या प्रदीयते॥ उभे ते एकशुल्केन वहे

१५

१४

॥हृतं विषमे मृतं॥ हीनं पुरुषकारेण प्रदद्यात्पाल एव तु॥ विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति॥ यदि देशे च का
ले च स्वामिनः स्वस्य शंसति॥ कर्णौ चर्म च वालांश्च वस्तिं स्नायुं च रोचनां॥ पशुस्वामिषु दद्यात्तु मृतेष्वंगानि दर्शये
त्॥ अजाविके तु संरुद्धे वृकैः पाले त्वनायति॥ यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत्॥ तासां चेदवरुद्धानां च
रंतीनां मिथो वने॥ यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी॥ धनुःशतं परिहारो ग्रामस्य स्यात्समंततः॥ शम्या
पातास्त्रयो वापि त्रिगुणो नगरस्य तु॥ तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि॥ न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षि
णां॥ वृतिं तु तत्र कुर्वीत यामुष्ट्रो नावलोकयेत्॥ छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगं॥ पथि क्षेत्रे परिवृते ग्रामा
न्तीयेऽथवा पुनः॥ सपालः शतदंडार्हो विपालान्वारयेत्पशून्॥ क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति॥ स
र्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा॥ अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा॥ सपालान्वा विपालान्
वा न दंड्यान्मनुरब्रवीत्॥ क्षेत्रिकस्यात्यये दंडो भागाद्दशगुणो भवेत्॥ ततोऽर्द्धदंडो भृत्यानामज्ञानात्क्षेत्रिकस्य
तु॥ एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः॥ स्वामिनां च पशूनां च पालानां च व्यतिक्रमे॥ सीमां प्रति समुत्पन्ने

Indira Gandhi National Centre for the Arts

विवादे ग्राममोर्द्वयोः॥ ज्येष्ठमासि नयेत्सीमां सुप्रकाशेषु सेतुषु॥ सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुका
नू॥ शाल्मलीशालतालांश्च क्षीरिणश्चैव पादपानू॥ गुल्मान्वेणूंश्च विविधानू शमीवल्लीस्थलानि च॥ सरानू
कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥ तडागान्युदपानानि वाप्यःप्रस्रवणानि च॥ सीमासंधिषु कार्याणि
देवतायतनानि च॥ उपछन्नानि चान्यानि सीमालिंगानि कारयेतू॥ सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं
अश्मनोस्थीनि गोवालांस्तुषानू भस्मकपालिकाः॥ करीषमिष्टकांगारांशर्करावालुकास्तथा॥ यानि चैवंप्रका
राणि कालाद्भूमिर्न भक्षयेतू॥ तानि संधिषु सीमायामप्रकाशानि कारयेतू॥ एतैर्लिंगैर्नयेत्सीमां राजा विवदमा
नयोः॥ पूर्वभुक्त्या तु सततमुदकस्यागमेन च॥ यदि संशय एव स्याल्लिंगानामपि दर्शने॥ साक्षिप्रत्यय ए
व स्यात्सीमावादविनिर्णयः॥ ग्रामेयककुलानां तु समक्षं सीम्नि साक्षिणः॥ प्रष्टव्याः सीमलिंगानि तयोश्चैव विवा
दिनोः॥ ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयं॥ निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः॥ शिरोभि ७६
स्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः॥ सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समंजसं॥ यथोक्तेन नयन्तस्ते पूयन्ते स १५

त्यसाक्षिणः॥ विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमं॥ साक्ष्यभावे च चत्वारो ग्रामाः सामन्तवासिनः॥ सी
माविनिर्णयं कुर्युः प्रयता राजसन्निधौ॥ सामन्तानामभावे तु मौलानां सीम्नि साक्षिणां॥ इमानप्यनुयुं
जीत पुरुषान्वनगोचरानू॥ व्याधानू शाकुनिकान्गोपानू कैवर्तान्मूलखानकानू॥ व्यालग्राहानुञ्छवृत्तीन
न्यांश्च वनगोचरानू॥ ते पृष्टास्तु यथा ब्रूयुः सीमासंधिषु लक्षणं॥ तत्तथा स्थापयेद्राजा धर्मेण ग्रामयो
र्द्वयोः॥ क्षेत्रकूपतडागानामारामस्य गृहस्य च॥ सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णये॥ सामन्ताश्चे
न्मृषा ब्रूयुः सेतौ विवदतां नृणां॥ सर्वे पृथक्पृथक् दंड्या राज्ञा मध्यमसाहसं॥ गृहं तडागमारामं क्षेत्रं
वा भीषया हरनू॥ शतानि पंच दंड्यः स्यादज्ञानाद्द्विशतो दमः॥ सीमायामविषह्यायां स्वयं राजैव धर्म
वित्॥ प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः॥ एषोखिलेनाभिहितो धर्मः सीमाविनिर्णये॥ अत ऊ
र्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयं॥ शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति॥ वैश्योप्यर्धशतं द्वे वा शूद्रस्तु
वधमर्हति॥ पंचाशद्ब्राह्मणो दंड्यः क्षत्रियस्याभिशंसने॥ वैश्ये स्यादर्धपंचाशच्छूद्रे द्वादशको दमः

Indira Gandhi National
Centre for the Arts

॥समुत्कर्षापकर्षाभ्यां विप्रवद्दंडकल्पना॥ राजन्यवैश्यशूद्राणां वधवर्ज्जमिति स्थितिः॥ विप्रक्षत्रियव
कार्यो दंडो राजन्यवैश्ययोः॥ वैश्यक्षत्रिययोः शूद्रे विप्रवत्क्षत्रवैश्ययोः॥ समवर्णे द्विजातीनां द्वादशै
व व्यतिक्रमे॥ वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्॥ एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्॥ जि
ह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥ नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः॥ निक्षेप्यो योमयः
शंकुर्ज्वलन्नास्ये दशांगुलः॥ धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः॥ तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च
पार्थिवः॥ श्रुतं देशं च जातिं च कर्म शारीरमेव च॥ वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमं॥ काण
म वाप्यथ खंजं वा धं वापि तथाविधं॥ तथ्येनापि ब्रुवन्दाप्यो दंडं कार्षापणावरं॥ मातरं पितरं जाया ७७
भ्रातरं तनयं गुरुं॥ आक्षारयञ्छतं दाप्यः पंथानं चाददद्गुरोः॥ ब्राह्मणक्षत्रियाभ्यां तु दंडः कार्यो विजान
ता॥ ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः॥ विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः॥ छेदवर्ज्ज
प्रणयनं दंडस्येति विनिर्णयः॥ पतितं पतितेत्युक्त्वा चौरं चौरेति वा पुनः॥ वचनात्तुल्यदोषः स्यान्मि

थ्याद्द्विर्दोषतां व्रजेत्॥ एष दंडविधिः कृत्स्नो वाक्पारुष्यस्य तत्त्वतः॥ अत ऊर्ध्वं प्रवक्ष्यामि दंडपारुष्यनिर्ण
यं॥ येन केनचिदंगेन हिंस्याच्चेच्छ्रेष्ठमंत्यजः॥ छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं॥ पाणिमुद्यम्य दंडं
वा पाणिच्छेदनमर्हति॥ पादेन प्रहरन्कोपात्पादच्छेदनमर्हति॥ सहासनमभिप्रेप्सुरुत्कृष्टस्याव
कृष्टजः॥ कट्यां कृतांको निर्वास्यः स्फिजं वास्यावकर्त्तयेत्॥ अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः॥ अ
वमूत्रयतो मेढ्रमवशर्द्धयतो गुदं॥ केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्॥ पादयोर्द्दाढिकायां च ग्रीवा
यां वृषणेषु च॥ त्वग्भेदकः शतं दंड्यो लोहितस्य च दर्शकः॥ मांसभेत्ता तु षण्निष्कान्प्रदाप्यस्त्वस्थि
भेदः॥ वनस्पतीनां सर्वेषामुपभोगो यथा यथा॥ तथा तथा दमः कार्यो हिंसायामिति धारणा॥ मनुष्या
णां पशूनां च दुःखाय प्रहृते सति॥ यथा यथा महद्दुःखं दंडं कुर्यात्तथा तथा॥ अंगावपीडनायां च व्रणशो
णितयोस्तथा॥ समुत्थानव्ययं दाप्यः सर्वदंडमथापि वा॥ द्रव्याणि हिंसाद्यो यस्य ज्ञानतो ज्ञानतो पि वा॥
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समं॥ चर्मचार्मिकभांडेषु काष्ठलोष्टमयेषु च॥ मूल्यात्पंचगुणो

Indira Gandhi National
Centre for the Arts

दंडः ॥ पुष्पमूलफलेषु च ॥ यानस्यैव तु यातुस्व यानस्वामिन एव च ॥ दशातिवर्त्तनान्याहुः शेषे दंडो विधी-
यते ॥ छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते ॥ अक्षभंगे च यानस्य चक्रभंगे तथैव च ॥ छेदने चैव यं-
त्राणां योक्त्ररश्म्योस्तथैव च ॥ आक्रंदे चाप्यपैहीति न दंडं मनुरब्रवीत् ॥ यत्रापवर्त्तते युग्यं वैगुण्यात्
प्राजकस्य तु ॥ तत्र स्वामी भवेद्दंड्यो हिंसायां द्विशतं दमं ॥ प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति ॥ युग्य-
स्थाः प्राजकेऽनाप्ते सर्वे दंड्याः शतं शतं ॥ स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा ॥ प्रमापयेत्प्राणभृतस्त-
त्र दंडो विचारितः ॥ मानुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत् ॥ प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु
॥ क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ॥ पंचाशत्तु भवेद्दंडः शुभेषु मृगपक्षिषु ॥ गर्दभाजाविका-
नां तु दंडः स्यात्पंचमाषिकः ॥ माषिकस्तु भवेद्दंडः श्वसूकरनिपातने ॥ भार्यापुत्रश्च दासश्च शिष्यो भ्रा- ७८
ता च सोदरः ॥ प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ पृष्ठतस्तु शरीरस्य नोत्तमांगे कथंचन ॥ अतो- १९
३ ऽन्यथा प्रहरन्प्राप्तः स्याच्चौरकिल्बिषं ॥ एषोऽखिलेनाभिहितो दंडपारुष्यनिर्णयः ॥ स्तेनस्यातः प्रवक्ष्यामि वि-

धिं दंडविनिर्णये ॥ परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः ॥ स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्द्धते ॥ अभय-
स्य हि यो दाता स पूज्यः सततं नृपः ॥ सत्रं हि वर्द्धते तस्य सदैवाभयदक्षिणं ॥ सर्वतो धर्मषड्भागो राज्ञो भवति र-
क्षतः ॥ अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥ यदधीते यद्यजते यद्ददाति यदर्चति ॥ तस्य षड्भागभाग्राजा
सम्यग्भवति रक्षणात् ॥ रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन् ॥ यजतेऽहरहर्यज्ञैः सहस्रशतदक्षि-
णैः ॥ योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः ॥ प्रतिभागं च दंडं च स सद्यो नरकं व्रजेत् ॥ अरक्षितारं राजानं ब-
लिषड्भागहारिणं ॥ तमाहुः सर्वलोकस्य समग्रमलहारकं ॥ अनवेक्षितमर्यादं नास्तिकं विप्रलुंपकं ॥ अरक्षि-
तारमत्तारं नृपं विद्यादधोगतिं ॥ अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः ॥ रोधनेन च बंधेन विविधे-
न वधेन च ॥ निग्रहेण च पापानां साधूनां संग्रहेण च ॥ द्विजातय इवेज्याभिः पूयंते सततं नृपाः ॥ क्षंतव्यं
प्रभुणा नित्यं क्षिपतां कार्यिणां नृणां ॥ बालवृद्धातुराणां च कुर्वता हितमात्मनः ॥ यः क्षिप्तो मर्षयत्यार्तैस्
तेन स्वर्गे महीयते ॥ यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ॥ राजा स्तेनेन गंतव्यो मुक्तकेशेन धावता ॥ आ-

Indira Gandhi National Centre for the Arts

चक्षाणेनतत्स्तेयमेवंकर्मास्मिशाधिमां॥स्कंधेनादायमुशलंलगुडंवापिखादिरं॥शक्तिंचोभयतस्तीक्ष्णामा
यसंदंडमेववा॥शासनाद्वाविमोक्षाद्वास्तेनःस्तेयाद्विमुच्यते॥अशासित्वातुतंराजास्तेनस्याप्नोतिकिल्बिषं
॥अन्नादेभ्रूणहामार्ष्टिपत्यौभार्यापचारिणी॥गुरौशिष्यश्चयाज्यश्चस्तेनोराजनिकिल्बिषं॥राजभिर्धृ
तदंडास्तुकृत्वापापानिमानवाः॥निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथा॥यस्तुरज्जुंघटंकूपाद्धरेद्भि
द्याच्चयःप्रपां॥सदंडंप्राप्नुयान्माषंतच्चतस्मिन्समाहरेत्॥धान्यंदशभ्यःकुंभेभ्योहरतेभ्यधिकोवधः॥
शेषेप्येकादशगुणंदाप्यस्तस्यचतद्धनं॥तथाधरिममेयानांशतादभ्यधिकेवधः॥सुवर्णरजतादी
नामुत्तमानांचवाससां॥पंचाशतस्त्वभ्यधिकेहस्तच्छेदनमिष्यते॥शेषेप्येकादशगुणंमूल्याद्दंडंप्रक
ल्पयेत्॥पुरुषाणांकुलीनानांनारीणांचविशेषतः॥मुख्यानांचैवरत्नानांहरणेवधमर्हति॥महाप ७२
शूनांहरणेशस्त्राणामौषधस्यच॥कालमासाद्यकार्यंचराजादंडंप्रकल्पयेत्॥गोषुब्राह्मणसंस्थासु १८
छुरिकायाश्चभेदने॥पशूनांहरणेचैवसद्यःकार्योर्धपादिकः॥सूत्रकार्पासकिण्वानांगोमयस्यगुड

स्यच॥दध्नःक्षीरस्यतक्रस्यपानीयस्यतृणस्यच॥वेणुवैदलभांडानांलवणानांतथैवच॥मृन्मयानां
चहरणेमृदोभस्मनएवच॥मत्स्यानांपक्षिणांचैवतैलस्यचघृतस्यच॥मांसस्यमधुनश्चैवयच्चान्य
त्पशुसंभवं॥अन्येषांचैवमादीनांमद्यानामोदनस्यच॥पक्वान्नानांचसर्वेषांतन्मूल्याद्द्विगुणोदमः॥
पुष्पेषुहरितेधान्येगुल्मवल्लीलतासुच॥अल्पेष्वपरिपूतेषुदंडःस्यात्पंचकृष्णलः॥परिपूतेषुधान्येषु
शाकमूलफलेषुच॥निरन्वयेशतंदंडःसान्वयेर्धशतंदमः॥स्यात्साहसंत्वन्वयवत्प्रसभंकर्मयत्कृतं
॥निरन्वयंभवेत्स्तेयंहृत्वापव्ययतेचयत्॥यस्त्वेतान्युपक्लृप्तानिद्रव्याणिस्तेनयेन्नरः॥तमाद्यंदंडयेद्रा
जायश्चाग्निंचोरयेद्गृहात्॥येनयेनयथांगेनस्तेनोनृषुविचेष्टते॥तत्तदेवहरेत्तस्यप्रत्यादेशायपार्थिवः
॥पिताचार्यःसुहृन्माताभार्यापुत्रःपुरोहितः॥नादंड्योनामराज्ञोस्तियःस्वधर्मेणतिष्ठति॥कार्षापणंभवेद्दं
ड्योयत्रान्यःप्राकृतोजनः॥तत्रराजाभवेद्दंड्यःसहस्रमितिधारणा॥अष्टापाद्यंतुशूद्रस्यस्तेयेभवतिकिल्बिषं
षोडशैवतुवैश्यस्यद्वात्रिंशत्क्षत्रियस्यतु॥ब्राह्मणस्यचतुःषष्टिःपूर्णंचापिशतंभवेत्॥द्विगुणावाच

Indira Gandhi National
Centre for the Arts

तुःषष्ठिस्तद्दोषगुणविद्धि सः॥ वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च॥ तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवी
त्॥ योदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनं॥ याजनाध्यापनेनापि यथा स्तेनस्तथैव सः॥ द्विजोध्वगः क्षीण
वृत्तिर्द्वाविक्षू द्वे च मूलके॥ आददानः परक्षेत्रान्न दंडं दातुमर्हति॥ असंदितानां संदाता संदितानां च मोक्षकः॥
दाराश्वरथहर्त्ता च प्राप्तः स्याच्चौरकिल्बिषं॥ अनेन विधिना राजा कुर्वाणः स्तेननिग्रहं॥ यशोस्मिन्प्राप्नुयाल्लो
के प्रेत्य चानुत्तमं सुखं॥ ऐंद्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययं॥ नैपेक्षेत क्षणमपि राजा साहसिकं नरं॥ वाग्दु
ष्टात्तस्कराच्चैव दंडेनैव च हिंसकात्॥ साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः॥ साहसे वर्तमानं तु यो मर्षयति
पार्थिवः॥ स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति॥ न मित्रकारणाद्राजा विपुलाद्वा धनागमात्॥ समुत्सृजे
त्साहसिकान्सर्वभूतभयावहान्॥ शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते॥ द्विजातीनां तु वर्णानां विप्ल
वे कालकारिते॥ आत्मनश्च परित्राणे दक्षिणानां च संगरे॥ स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति॥
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं॥ आततायिनमायान्तं हन्यादेवाविचारयन्॥ नाततायिवधे दोषो

हंतुर्भवति कश्चन॥ प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छति॥ परदाराभिमर्षेषु प्रवृत्तान्नॄन्महीप
तिः॥ उद्वेजनकरैर्दंडैश्छिन्नयित्वा प्रवासयेत्॥ तत्समुत्थो हि लोकस्य जायते वर्णसंकरः॥ येन मूलहरो धर्मः
सर्वनाशाय कल्पते॥ परस्य पत्न्या पुरुषः संभाषां योजयन्रहः॥ पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाह
सं॥ यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्॥ न दोषं प्राप्नुयात्किंचिन्न हि तस्य व्यतिक्रमः॥ परस्त्रियं यो
भिवदेत्तीर्थेरण्ये वनेपि वा॥ नदीनां वापि संभेदे स संग्रहणमाप्नुयात्॥ उपकारक्रियाकेलिस्पर्शो भूषणवाससां
॥ सह खट्वासनं चैव सर्वं संग्रहणं स्मृतं॥ स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया॥ परस्परस्यानुमते स
र्वं संग्रहणं स्मृतं॥ अब्राह्मणः संग्रहणे प्राणांतं दंडमर्हति॥ चतुर्णामपि वर्णानां दारा रक्षतमाः सदा॥ भिक्षु
का बंदिनश्चैव दीक्षिताः कारवस्तथा॥ संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः॥ न संभाषं परस्त्रीभिः प्रतिषिद्धः
समाचरेत्॥ निषिद्धो भाषमाणस्तु सुवर्णं दंडमर्हति॥ नैष चारणदारेषु विधिर्नात्मोपजीविषु॥ सज्जयं
ति हि ते नारीर्निगूढाश्चारयंति च॥ किंचिदेव तु दाप्यः स्यात्संभाषं ताभिराचरन्॥ प्रेष्यासु चैकभक्तासु रहः

Indira Gandhi National
Centre for the Arts

प्रव्रजितासु च॥ योकामां दूषयेत्कन्यां स सद्यो वधमर्हति॥ सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः॥ कन्यां
भजंतीमुत्कृष्टं न किंचिदपि दापयेत्॥ जघन्यं सेवमानां तु संयतां वासयेद्गृहे॥ उत्तमां सेवमानस्तु जघन्यो वध
मर्हति॥ शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि॥ अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः॥ तस्याशु
कर्त्ये अंगुल्यौ दंडं चार्हति षट्शतं॥ सकामां दूषयंस्तुल्यो नांगुलिच्छेदमाप्नुयात्॥ द्विशतं तु दमं दाप्यः प्रसं
गविनिवृत्तये॥ कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः॥ शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश
॥ या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौंड्यमर्हति॥ अंगुल्योरेव वा छेदं खरेणोद्वहनं तथा॥ भर्त्तारं लंघयेद्य
द्यातु ज्ञातिस्त्रीबलदर्पिता॥ तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥ पुमांसं दाहयेत्पापं शयने तप्त
आयसे॥ अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत्॥ संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः॥ व्रात्य
या सह संवासे चंडाल्या तावदेव तु॥ शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्॥ अगुप्ते कांगसर्वस्वी गुप्ते
सर्वेण हीयते॥ वैश्यः सर्वस्वदंडः स्यात्संवत्सरनिरोधनः॥ सहस्रं क्षत्रियो दंड्यो मौंड्यं मूत्रेण वा इति

॥ ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ॥ वैश्यं पंचशतं कुर्यात्क्षत्रियं तु सहस्रिकं॥ उभावपि तु तावेव ब्रा
ह्मण्या गुप्तया सह॥ विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना॥ सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रो बला
द्व्रजन्॥ शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः॥ मौंड्यं प्राणांतिको दंडो ब्राह्मणस्य विधीयते॥ इतरे
षां तु वर्णानां दंडः प्राणांतिको भवेत्॥ न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितं॥ राष्ट्रादेनं बहिः कुर्यात्स
मग्रधनमक्षतं॥ न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि॥ तस्मादस्य वधं राजा मनसापि न चिंतयेत्॥ वै
श्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्॥ यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः॥ सहस्रं ब्राह्मणो
दंडं दाप्यो गुप्ते तु ते व्रजन्॥ शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः॥ अगुप्ते वैश्यराजन्ये शूद्रां च ब्राह्म
णो व्रजन्॥ शतानि पंच दंड्यः स्यात्सहस्रं त्वंत्यजस्त्रियं॥ यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्
न साहसिकदंडघ्नौ स राजा शक्रलोकभाक्॥ एतेषां निग्रहो राज्ञः पंचानां विषये स्वके॥ साम्राज्यकृत्स
जात्येषु लोके चैव यशस्करः॥ ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि॥ शक्तं कर्मण्यदुष्टं च तयोर्दंडः शतं

Indira Gandhi National
Centre for the Arts

यातं॥ न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति॥ त्यजन्नपतितानेतान्राज्ञा दंड्यः शतानि षट्॥ आश्रमेषु द्विजा
तीनां कार्ये विवदतां मिथः॥ न विब्रूयान्नृपो धर्मं चिकीर्षुर्हितमात्मनः॥ यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह
पार्थिवः॥ सांत्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत्॥ प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे॥ अर्हाव
भोजयन्विप्रो दंडमर्हति माषकं॥ श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन्॥ तदन्नं द्विगुणं दाप्यो
हिरण्यं चैव माषकं॥ अंधो जडः पीठसर्पी सप्तत्या स्थविरश्च यः॥ श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचि
त्करं॥ श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिंचनं॥ महाकुलीनमार्यं च राजा संपूजयेत्सदा॥ शाल्मलीफ
लके श्लक्ष्णे नेनिज्यान्नेजकः शनैः॥ न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्॥ तंतुवायो दशपलं दद्यादे
कपलाधिकं॥ अतोन्यथा वर्तमानो दाप्यो द्वादशकं दमं॥ शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः॥ ८२
॥ कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत्॥ राज्ञः प्रख्यातभांडानि प्रतिषिद्धानि यानि च॥ तानि निर्ह
रतो लोभात्सर्वहारं हरेन्नृपः॥ शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी॥ मिथ्यावादी च संख्याने दाप्यो २१

ष्टगुणमत्ययं॥ आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ॥ विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ॥ पंचरा
त्रे पंचरात्रे पक्षे पक्षेथवा गते॥ कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः॥ तुलामानं प्रतीमानं सर्वं च स्यात्सुवि
लक्षितं॥ षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत्॥ पणं यानं तरे दाप्यं पौरुषोर्धपणं तरे॥ पादं पशुश्च योषि
च्च पादार्धं रिक्तकः पुमान्॥ भांडपूर्णानि यानानि तार्यं दाप्यानि सारतः॥ रिक्तभांडानि यत्किंचित्पुमांसश्चापरिच्छ
दाः॥ दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्॥ नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणं॥ गर्भिणी तु द्विमासा
दिस्तथा प्रव्रजितो मुनिः॥ ब्राह्मणा लिंगिनश्चैव न दाप्यास्तारिकं तरे॥ यन्नावि किंचिद्दाशानां विशीर्येतापराधतः
तद्दाशैरेव दातव्यं समागम्य स्वतोंशतः॥ एष नौयायिनामुक्तो व्यवहारस्य निर्णयः॥ दाशापराधतस्तोये दैविके
नास्ति निग्रहः॥ वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च॥ पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनां॥ क्षत्रियं
चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ॥ बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत्॥ दास्यं तु कारयल्लोभा
द्ब्राह्मणः संस्कृतान्द्विजान्॥ अनिच्छतः प्राभवत्याद्राज्ञा दंड्यः शतानि षट्॥ शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमे

Indira Gandhi National
Centre for the Arts

वत्॥ दास्यायैव हि सृष्टोसौ ब्राह्मणस्य स्वयंभुवा॥ न स्वामिना निसृष्टोपि शूद्रो दास्याद्विमुच्यते॥ निसर्गजं हि तत्तस्य
कस्तस्मात्तदपोहति॥ ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ॥ पैत्रिको दंडदासश्च सप्तैते दासयोनयः॥ भार्या पुत्र
श्च दासश्च त्रय एवाधनाः स्मृताः॥ यत्ते समधिगच्छंति यस्य ते तस्य तद्धनं॥ विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादा
तस्यास्ति नमाचरेत्॥ नहि किंचित्स्वं भर्तृहार्यधनो हि सः॥ वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्॥ तौ हि च्युतौ
स्वकर्मभ्यः क्षोभयेतामिदं जगत्॥ अहन्यहन्यवेक्षेत कर्मांतान्वाहनानि च॥ आयव्ययौ च नियतावाकरा
न्कोशमेव च॥ एवं सर्वानिमान्राजा व्यवहारान्समापयन्॥ व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिं॥ ॥ ॥
इति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायामष्टमोध्यायः॥ ॥ श्री॥ ॥ पुरुषस्य स्त्रियाश्चैव ध
र्मे वर्त्मनि तिष्ठतोः॥ संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्॥ अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वै ८३
र्दिवानिशं॥ विषयेषु च सज्जंत्यः संस्थाप्या आत्मनो वशे॥ पिता रक्षति कौमारे भर्ता रक्षति यौवने॥ रक्षंति
स्थविरे पुत्रा न स्त्री स्वातंत्र्यमर्हति॥ काले दाता पिता वाच्यो वाच्यश्चानुपयन्पतिः॥ मृते भर्तरि पुत्रस्तु वा २२

च्यो मातुररक्षिता॥ इमं हि सर्ववर्णानां पश्यंतो धर्ममुत्तमं॥ यतंते रक्षितुं भार्यां संप्रविश्य गर्भो भूत्वेह जायते॥
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥ यादृशं भजते हि स्त्री सुतं सूते तथाविधं॥ तस्मात्प्रजावि
शुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः॥ न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुं॥ एतैरुपाययोगैस्तु शक्यास्ताः प
रिरक्षितुं॥ अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्॥ शौचे धर्मेन्नपक्त्यां च पारिणाह्यस्य वेक्षणे॥ अरक्षि
ता गृहे रुद्धाः पुरुषैराप्तकारिभिः॥ आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः॥ पानं दुर्जनसंसर्गः
पत्या च विरहोटनं॥ स्वप्नोन्यगेहवासश्च नारी संदूषणानि षट्॥ नैता रूपं परीक्षंते नासां वयसि संस्थितिः॥
सुरूपं वा विरूपं वा पुमानित्येव भुंजते॥ पौंश्चल्याच्चलचित्ताच्च नैस्नेह्याच्च स्वभावतः॥ रक्षिता यत्नतोपि
हि भर्तृष्वेता विकुर्वते॥ एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजं॥ परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति॥
शय्यासनमलंकारं कामं क्रोधमनार्जवं॥ द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत्॥ नास्ति स्त्रीणां क्रिया
मंत्रैरिति धर्मे व्यवस्थितिः॥ निरिंद्रिया ह्यमंत्राश्च स्त्रियोनृतमिति स्थितिः॥ तथा च श्रुतयो बह्व्यो नि

Indira Gandhi National
Centre for the Arts

म·स
०२·२२

मनुस्मृति २२।५००

द्वि·१५९२

गीतानिगमेष्वपि॥स्वलक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतिं॥यन्मेमाता प्रलुलुभे विचरंत्यपतिव्रता॥तन्मे
रेतः पिता वृंक्तामित्यस्यैतन्निदर्शनं॥ध्यायत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा॥तस्यैष व्यभिचारस्य
निह्नवः सम्यगुच्यते॥यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि॥तादृग्गुणा सा भवति समुद्रेणेव निम्नगाः
॥अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा॥शार्ङ्गी चमंदपालेन जगामाभ्यर्हणीयतां॥एताश्चान्याश्च
लोकेस्मिन्नपकृष्टप्रसूतयः॥उत्कर्षं योषितः प्राप्ताः स्वैस्वैर्भर्तृगुणैः शुभैः॥एषोदिता लोकयात्रा नित्यं स्त्री
पुंसयोः शुभाः॥प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधतः॥प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः॥
स्त्रियः श्रियश्च गेहेषु न विशेषोस्ति कश्चन॥उत्पादनमपत्यस्य जातस्य परिपालनं॥प्रत्यहं लोकयात्रायाः प्रत्य
क्षं स्त्री निबंधनं॥अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा॥दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह॥ ८४
पतिं या नाभिचरति मनोवाग्देहसंयता॥सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते॥व्यभिचारात्तु भ
र्तुः स्त्री लोके प्राप्नोति निंद्यतां॥सृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते॥पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च म २२